# श्री विष्णुषट्पदी स्तोत्रं

अविनयमपनय ! विष्णो !
दमय ! मनः शमय ! विषयमृगतृष्णाम् ।
भूतदयां विस्तारय !
तारय ! संसारसागरतः ॥ 1

दिव्यधुनी मकरंदे
परिमल परिभोग सच्चिदानंदे ।
श्रीपति पदारविंदे
भव भय खेदच्छिदे वंदे ॥ 2

सत्यपि भेदापगमे
नाथ ! तवाहं न मामकीनस्त्वम् ।
सामुद्रो हि तरंगः
क्वचन समुद्रो न तारंगः ॥ 3

उद्धृतनग ! नगभिदनुज !
दनुजकुलामित्र ! मित्रशशिदृष्टे ! ।
दृष्टे भवति प्रभवति
न भवति किं भवतिरस्कारः ? ॥ 4

© 2022 Vedam Nadam

मत्स्यादिभि रवतारैः
अवतारवताऽवता सदा वसुधाम् ।
परमेश्वर! परिपाल्यो
भवता भव ताप भीतोऽहम् ॥ 5

दामोदर ! गुणमंदिर !
सुंदर वदनारविंद, गोविंद ।
भवजलधि मथन मंदर !
परमं दरमपनय ! त्वं मे ॥ 6

नारायण ! करुणामय !
शरणं करवाणि तावकौ चरणौ ।
इति षट्पदी मदीये
वदनसरोजे सदा वसतु ॥ 7

॥ इति श्रीमच्छंकर भगवत्पाद कृतं विष्णुषट्पदी स्तोत्रं संपूर्णम् ॥